# षष्ठः पाठः । पिन्कोड्-प्रवर्तकः, महान् संस्कृतज्ञः !

गौरवः – अरे अमेय, कुत्र गच्छसि ?

अमेयः – समीपे एव पत्रपेटिका वर्तते। मातुलं प्रति पत्रं प्रेषयितुं तत्र गच्छामि।

गौरवः – दर्शय पत्रम्। अपि बेङ्गलुरुनगरे निवसति तव मातुलः ? तत् तु अतीव दूरे किल ? कदा पत्रं विन्देत् सः ?

अमेयः – सामान्यतः त्रीणि दिनानि अपेक्षितानि तदर्थम्।

गौरवः – त्रीणि दिनानि एव ? एतावत् शीघ्रम् ?

अमेयः – सत्यम्।

गौरवः – किन्तु सङ्केतः तु देवनागरीलिप्या लिखितः। कर्णाटके तु कन्नडलिपिः प्रयुज्यते नु ? तर्हि कथं पत्रवाहकः तत् पठितुं शक्नुयात् ?

अमेयः – पश्य एतत्। सङ्केतस्य अन्ते आङ्ग्लभाषया कश्चन क्रमाङ्कः लिखितः अस्ति। जानासि खलु तद्विषये ?

गौरवः – आम्, सः तु पिन्कोड्क्रमाङ्कः। अहं पत्रं न लिखामि किन्तु सद्यस्क-क्रयणसमये (Online Shopping) पिन्कोड्क्रमाङ्कः अनिवार्यः एव। इतोऽपि च अस्माकं विभागे ATM शाखाः, रुग्णालयाः, विशिष्टसेवाः वा कुत्र सन्ति इति ज्ञातुं पिन्कोड्क्रमाङ्कः आवश्यकः एव।

अयि मित्राणि, भारतसदृशे विशाले देशे सुदूरप्रान्तेभ्यः अन्यप्रान्तं प्रति प्रेषितानि पत्राणि विना विलम्बं विना प्रमादं कथं लभ्यन्ते? वयम् अस्माकं निवासविभागे पत्रपेटिकायां पत्रं क्षिपामः। ततः तत् पत्रालयं प्रति गच्छति। ततः च निर्दिष्टं स्थानं प्रति प्राप्नोति। कथं शक्या भवति एषा वितरणव्यवस्था? 'पिन्कोड्प्रणालिः' इत्येव एतस्य प्रश्नस्य उत्तरम्। पिन्कोड्क्रमाङ्कः नाम पत्रसङ्केतस्य अन्ते लिखिताः षट् सङ्ख्याः। पिन्कोड् नाम स्थानसङ्केताङ्कः। (PIN - Postal Index Number). ऑगस्ट १९७२-तमे ख्रिस्ताब्दे स्वातन्त्र्यदिनसमारोहे प्रधानमन्त्रि-इन्दिरा-गान्धी-महोदयायै उपहारीकृता एषा महत्त्वपूर्णा प्रणालिः। केन खलु प्रवर्तिता इयं सङ्केताङ्क प्रणालिः ? सः पत्रालय-अधिकारी आसीत् संस्कृतपण्डितः गणितज्ञः **श्रीराम-भिकाजी-वेलणकरमहोदयः।**




सः कोलकतानगरे डाकतारविभागस्य निर्देशकरूपेण कार्यरतः आसीत्। तस्य कार्यकाले एकस्मिन् दिने कोऽपि दुःखितः केरल-प्रदेशीयः सैनिकः महोदयं मेलितुम् आगतः। सः तस्य पित्रोः स्वास्थ्यविषये किञ्चिदपि ज्ञातुम् असमर्थः। यतः तदा पत्रस्य प्रवासकालः केरलतः अरुणाचलप्रदेशपर्यन्तं क्वचित् मासाधिकोऽपि आसीत्। तेन पं. वेलणकरमहोदयस्य चिन्तनम् आरब्धम्, 'कथं पत्रस्य प्राप्तिकालं न्यूनं कर्तुं शक्नोमि?' दुर्बोधं हस्ताक्षरं, भिन्नाः प्रान्तीयाः भाषाः, अपूर्णः पत्रसङ्केतः इति नैके प्रत्यूहाः। अतः गणितज्ञेन तेन अङ्कानाम् उपयोगः कृतः। तेन देशस्य अष्ट विभागाः कृताः। तेषां च उपविभाग-जनपदाधारेण क्रमाङ्कनं कृतम्। तेन अधुनापि वयं विनायासं शीघ्रं पत्रं लभामहे।

अनुशासनप्रियस्य वेलणकरमहोदयस्य सङ्गीतमपि प्रियः विषयः। सः व्हायोलिनवादने तथा तबलावादनेऽपि

अतीव निपुणः। अतः एव सः 'गीतगीर्वाणम्' इति सङ्गीतविषयकं शास्त्रीयग्रन्थं संस्कृतेन रचितवान्। कथाः, गीतानि, बालगीतानि, नृत्यनाट्यम् इति बहुविधाः रचनाः तेन कृताः तथापि नाट्यलेखनं तस्य अभिमतः साहित्यप्रकारः। लेखनं, दिग्दर्शनं, नाट्यनिर्मितिः, व्यवस्थापनं, सङ्गीतसंयोजनम् इति सर्वमेव कर्तुं सः समर्थः अतः "सबकुछ श्रीभिः" इति तस्य नाटकानां ख्यातिः आसीत्।

धन्यः सः विद्वद्वरेण्यः येन वयं पिन्कोड्प्रणाल्या उपकृताः।

CFULEF

## भाषाभ्यासः



**१. उचितं पर्यायं चिनुत।**

अ) पत्रवाहकः किं पठित्वा पत्रं वितरति ?

(१) देवनागरीलिपीम् (२) कन्नडलिपीम् (३) आङ्ग्लभाषाम् (४) सङ्केतक्रमाङ्कम्

आ) पिन्कोड्क्रमाङ्कः अत्र न आवश्यकः।

(१) रुग्णालये (२) सद्यस्क-क्रयणे (३) ATM शाखा-अन्वेषणे (४) पुस्तकपठने

इ) पिन्कोड्-प्रणालिः केन समारब्धा ?

(१) इन्दिरामहोदयया (२) गान्धीमहोदयेन (३) प्रधानमन्त्रिणा (४) वेलणकरमहोदयेन

ई) पिन्कोड्क्रमाङ्के कति सङ्ख्याः ? (१) ६ (२) ४ (३) ३ (४) २

**२. माध्यमभाषया लिखत।** १. वेलणकरमहोदयस्य कार्यवैशिष्ट्यानि लिखत।
२. वेलणकरमहोदयः केन प्रसङ्गेन पिन्कोड्निर्माणे प्रेरितः ?

**३. एकवाक्येन उत्तरत।**

अ) वेलणकरमहोदयस्य कः प्रियः विषयः ? आ) वेलणकरमहोदयः के वाद्ये वादयति स्म ?

इ) वेलणकरमहोदयेन रचितः सङ्गीतविषयकः ग्रन्थः कः ?

ई) पिन्कोड्प्रणालिनिमित्तं वेलणकरमहोदयेन देशस्य कति विभागाः कृताः ?


ऊ) वेलणकरमहोदयस्य अभिमतः साहित्यप्रकारः कः ?

**५. विशेषणानि अन्विष्य लिखत।**

अ) ______ प्रणालिः। आ) ______ सैनिकः।

इ) ______ भाषाः। ई) ______ हस्ताक्षरम्।

उ) ______ विषयः। ऊ) ______ रचनाः।




**अन्विष्यत लिखत च।**

**१. एताः सङ्ख्याः किं निर्दिशन्ति।**

| | | | | | |
|---|---|---|---|---|---|
| 4 | 0 | 0 | 0 | 7 | 9 |
| ? | ? | ? | ? | ? | ? |

**२. विविधदेशेषु अपि पत्रसङ्केताङ्कप्रणालिः वर्तते वा ?**



वेलणकरमहोदयेन लिखितानि नाटकानि।
सङ्गीतसौभद्रम्।
कालिदासचरितम्। जन्म रामायणस्य।
तनयो राजा भवति कथं मे ? राज्ञी दुर्गावती।
रणश्रीरङ्गम्। (त्रीणि नाटकानि) कालिन्दी।
स्वातन्त्र्यलक्ष्मीः (नभोनाट्यम्)।
स्वातन्त्र्यचिन्तामणिः (नभोनाट्यम्)।
कौटिलीयार्थनाट्यम् (दूरदर्शनमालिका)।

संस्कृतसाहित्ये वेलणकरमहोदयरचिताः शताधिकम् संस्कृतग्रन्थाः। तेषु नाटक-काव्य-सङ्गीतिका-नृत्य-नाट्य-विलोमकाव्यानि इत्यादयः विविधाः साहित्यप्रकाराः प्रसिद्धाः।